# ॥ गोकर्ण गणाधिपस्तुतिः ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम श्रीश्री सच्चिदानन्द शिवाभिनव नृसिंह भारती

महास्वाभिरनुगृहीता

कुक्षिस्फुरन्नागभीत्या मूषिकः प्रपलायते ।

इति मत्वा मयूरं किमारूढोऽसि गणाधिप ॥ १ ॥

मत्कुक्षिसुस्थमखिलजगदिति सर्वान् प्रबोधयितुम् ।

बृहदुदरतां कृपाब्धे धत्से किं करिवरास्य त्वम् ॥ २ ॥

त्वद्दर्शनकृतहासं चन्द्रमसं हन्तुमुद्युक्तम् ।

त्वामनुनेतुं ताराः कुसुमव्याजेन सेवन्ते ॥ ३ ॥

यच्चातुर्येण हि लोकानुद्धर्तुमम्बिकानाथः ।

गोकर्णे स्थितिमकरोल्लोकहितं तं प्रणौमि विघ्नेशम् ॥ ४ ॥

॥ इति श्रीगणाधिपस्तुतिः संपूर्णा ॥

## || gokarṇa gaṇādhipastutiḥ ||

śrīmatparamahaṁsetyādi samastabirudālaṅkṛta śrījagadguru sārvabhauma śrīśrī saccidānanda śivābhinava nṛsiṁha bhāratī mahāsvābhiranugṛhītā |

kukṣisphurannāgabhītyā mūṣikaḥ prapalāyate |

iti matvā mayūraṁ kimārūḍho'si gaṇādhipa || 1 ||

matkukṣisusthamakhilajagaditi sarvān prabodhayitum |

bṛhadudaratāṁ kṛpābdhe dhatse kiṁ karivarāsya tvam || 2 ||

tvaddarśanakṛtahāsaṁ candramasaṁ hantumudyuktam |

tvāmanunetuṁ tārāḥ kusumavyājena sevante || 3 ||

yaccāturyeṇa hi lokānuddhartumambikānāthaḥ |

gokarṇe sthitimakarollokahitaṁ taṁ praṇaumi vighneśam || 4 ||

|| iti śrīgaṇādhipastutiḥ sampūrṇā ||

www.kamakotimandali.com